# Shri Ramakrishna Stotram

# શ્રીરામકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Shri Ramakrishna Stotram

File name : rAmakRRiShNastotram8.itx

Category : deities_misc, gurudev, rAmakRiShNa, stotra

Location : doc_deities_misc

Author : Kalipada Bandyopadhyaya

Proofread by : Aruna Narayanan

Description-comments : rAmakRiShNastotramAlA, stavanAnjali

Acknowledge-Permission: Ramakrishna Shivananda Mission, Varasat

Latest update : June 12, 2023

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 12, 2023

*sanskritdocuments.org*

# શ્રીરામકૃષ્ણસ્તોત્રમ્

લબ્ધ્વા પાશ્ચાત્યશિક્ષામગણિતયુવકા ધર્મહીના વિમૂઢાઃ
    સ્વૈરાચાર પ્રમત્તાઃ શુભમતિરહિતા ધ્વંસમાર્ગં ગતાશ્ચ ।
તેષામુદ્ધારણાર્થં ભુવનવિજયિનં માતૃમન્ત્રં દદાનં
    વન્દે શ્રીરામકૃષ્ણં કલિકલુષહરં પાવનં પુણ્યરાશિમ્ ॥ ૧॥

ધર્માનૈક્યાત્ પૃથિવ્યામજનિ જનમનઃ સ્વાસુરી ભેદબુદ્ધિ-
    ર્હિંસા-દ્વેષોત્થદાવાનલ-દહન ભયવ્યાકુલે સર્વલોકે ।
"સર્વે ધર્માઃ સમાના" ઇતિ નિજચરિતૈર્મયાનવં દર્શયન્તં
    વન્દે શ્રીરામકૃષ્ણં હરિહરદયિતં કાલિકા-લીનચિત્તમ્ ॥ ૨॥

નાધીત્ય ગ્રન્થરાજિં ન ચ ગુરુભવનં શિષ્યરૂપેણ ગત્વા
    વેદાન્તાતીત-તત્ત્વં સુલલિત-વચનૈર્હેલયા કીર્તયન્તમ્ ।
જ્ઞાને તુઙ્ગં મહીધ્રં શિશુમિવ સરલં વિશ્વકલ્યાણમૂર્તિં
    વન્દે શ્રીરામકૃષ્ણં દ્વિજકુલતિલકં નિર્જરં માનવાખ્યમ્ ॥ ૩॥

બાલ્યાત્ ત્યાગસ્ય માર્ગે સ્થિરમતિચલિતં ભોગમાર્ગઞ્ચ હિત્વા
    પશ્યન્તં ન પ્રભેદં કમપિ કરધૃતે કાઞ્ચને મૃઞ્ચયે ચ ।
જિત્વા જૈવપ્રવૃત્તિં પ્રકૃતિસહચરં બ્રહ્મચર્યં ચરન્તં
    વન્દે શ્રીરામકૃષ્ણં જગતિ નિરુપમં સાધકેષ્વગ્રગણ્યમ્ ॥ ૪॥

જીવન્મુક્તં મહાન્તં વિજિત ભવ ભયં શુદ્ધસત્ત્વ-સ્વરૂપં
    વિશ્વારાધ્યં મહિમ્ના વિજિત રિપુચયં તાપસં દેવ કાન્તિમ્ ।
ભક્તાનામાર્ત્તિરાશિં નિજવરવપુષિ સ્વેચ્છયા ધારયન્તં
    વન્દે શ્રીરામકૃષ્ણં શરણગ-સદયં તાપિત-ત્રાણહેતુમ્ ॥ ૫॥

શ્યામાધ્યાને નિમગ્નં હસિત રુદિતયોર્લીલયા દીપ્યમાનં
    "મા ! મા ! મા ! મા !" બ્રુવાનં ચરણ-સરસિજે તન્મયં લુપ્તસંજ્ઞમ્ ।
ઉદ્ગીતે માતૃમન્ત્રે પુનરપિ તરસા લબ્ધ સંજ્ઞં સચેષ્ટં
    વન્દે શ્રીરામકૃષ્ણં સ્મરહર-રુચિરં પૂજિતં સર્વલોકૈઃ ॥ ૬॥

ગ્લાનૌ ધર્મસ્ય પૃથ્વ્યાં પ્રભવતિ કલુષે પીડ્યમાને ચ સાધૌ
    દુષ્ટાનાં શાસનાયાવતરતિ ભુવને વિશ્વરાડ્ વિશ્વભૂત્યૈ ।
યો રામો યો હિ કૃષ્ણઃ શમન-ભયહરો માનવ-ત્રાણકર્તા
    વિશ્વપ્રેમાવતારો ધૃતમનુજતનુ રામકૃષ્ણઃ સ એવ ॥ ૭॥

જાહ્નવ્યાઃ પુલિને પવિત્ર ધરણૌ શ્રી મન્દિરે શોભને
    ઘણ્ટા-શઙ્ખ-નિનાદ-નિત્યમુખરે ચોઙ્કાર-સન્દીપિતે ।
દિવ્યે ધામ્નિ દિને દિને ચ બહુભિઃ પુણ્યાર્થિભિઃ સેવિતે
    લીનં શ્રીભવતારિણી-ચરણયોઃ શ્રીરામકૃષ્ણં સ્તુમઃ ॥ ૮॥

ઇતિ શ્રીકાલીપદબન્ધોપાધ્યાય-વિદ્યાવિનોદ-વિરચિતં
    “શ્રીશ્રીરામકૃષ્ણસ્તોત્રમ્” સમ્પૂર્ણમ્ ।

Proofread by Aruna Narayanan

---

*Shri Ramakrishna Stotram*

pdf was typeset on June 12, 2023

Please send corrections to *sanskrit@cheerful.com*